# Navanita Krishna Ashtakam

# નવનીતકૃષ્ણાષ્ટકમ્

## Document Information

Text title : Navanita Krishna Ashtakam

File name : navanItakRRiShNAShTakam.itx

Category : vishhnu, aShTaka, krishna

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# Navanita Krishna Ashtakam

## નવનીતકૃષ્ણાષ્ટકમ્

મન્દસ્મિતં મધુરકોમલલાસ્થલીલં
    કન્દર્પકોટિકમનીયકિશોરમૂર્તિમ્ ।
કુન્દસ્ફુરદ્દશનકં કુટિલાલકાન્તં
    વન્દેય નન્દતનયં નવનીતકૃષ્ણમ્ ॥ ૧॥

નાટ્યાવલોકનકુતૂહલિભિઃ પ્રદિષ્ટં
    કોટ્યા કરસ્ય નવનીતઘનં દધાનમ્ ।
શાટ્યા શિશોરુચિતયા શબલાવલમં
    વીટ્યા લસન્મુખમિમો નવનીતકૃષ્ણમ્ ॥ ૨॥

મઞ્જીરમઞ્જુચરણં મૃદુલાઙ્ગુલીકં
    પુઞ્જીભવન્મધુપપુષ્કલપુષ્પમાલમ્ ।
કઞ્જીભવન્નયનમાશ્રિતિદેહભાજાં
    સઞ્જીવનં નમ મનો નવનીતકૃષ્ણમ્ ॥ ૩॥

પૂરેણ નીલમહસાં પરિપૂર્ણગાત્રં
    હારેણ મૌક્તિકજુષા હૃતસર્વચિત્તમ્ ।
ચોરેણ મોહિતમુનિં દધિકુણ્ડભાજા
    પારેગિરં સ્તુહિ મનો નવનીતકૃષ્ણમ્ ॥ ૪॥

પદ્માલયાધરણિપાલિતપાર્શ્વયુગ્મં
    સદ્માસ્થિતં મણિકનત્કનકાવક્લૃપ્તમ્ ।
છદ્માદિદૂરગજનૈઃ પરિચર્યમાણં
    વિદ્મઃ કથં વયમમું નવનીતકૃષ્ણમ્ ॥ ૫॥

ધ્યાતં સદા મુનિજનૈરભિવૃદ્ધહર્ષૈઃ
    પૂતં મુહુર્વ્રજવધૂજનચુમ્બિતૈસ્તૈઃ ।
ક્રીતં ક્ષણેન શરણાગતદીનવાચા
    સ્ફીતં શ્રિયા ભજ મનો નવનીતકૃષ્ણમ્ ॥ ૬॥

ઉદ્યન્મૃગાઙ્કકમનીયમુખારવિન્દં
    સદ્યઃસ્ફુરત્કમલકોમલલોચનાન્તમ્ ।
યદ્યન્નતાભિલષિતં તદુપાર્જયન્ત-
    મદ્ય સ્મરામિ સરસં નવનીતકૃષ્ણમ્ ॥ ૭॥

તુઙ્ગં ગુણૈરનુપમૈરનવદ્યગન્ધૈઃ
    સઙ્ગં શ્રિતેષુ સતતં સ્વયમાદધાનમ્ ।
અઙ્ગં વહન્તમતુલં નવમેઘનીલં
    ત્વં ગન્તુમર્હસિ મનો નવનીતકૃષ્ણમ્ ॥ ૮॥

નવનીતકૃષ્ણવિષયામવનીસુરભાવુકાં સ્તુતિં કથયન્ ।
સવની સમ્પન્નઃ સ્યાત્ સ વની સ યતિઃ સ એવ મુક્તશ્ચ ॥ ૯॥

ઇતિ શ્રીનવનીતકૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૬૨)

Proofread by Rajesh Thyagarajan

*Navanita Krishna Ashtakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*